# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

NABET | INDIAN PUBLIC SCHOOLS' CONFERENCE

**PERIODIC TEST-1 (2025-26)**
**SANSKRIT (119)**

**Class: VIII** | **Duration : 1 Hrs**
**Date: 05.07.2025** | **Max Marks: 25**
**Admission no:** | **Roll no:**

---

सामान्यनिर्देश-
1. कृपया अच्छी तरह परीक्षणं कर लें कि इस प्रश्नपत्र में 5 प्रश्न हैं।
2. प्रत्येक भाग के उत्तर एक ही स्थान में क्रम से लिखने की यथासंभव कोशिश करें।
3. उत्तरलेखन से पूर्व प्रश्न का क्रमाङ्क प्रश्नपत्र के अनुसार अवश्य लिखें।
4. प्रश्नों के निर्देश ध्यानपूर्वक अवश्यं पढ़ें।

---

प्रश्नपत्रस्वरूप -

| | |
|---|---|
| भाग 'क' : अपठित गद्यांश | 10 अङ्क |
| भाग 'ख' : व्याकरण | 10 अङ्क |
| भाग 'ग' : पाठ्यपुस्तक | 05 अङ्क |

---

## (खण्ड –क) अपठित गद्यांश

**प्रश्न 01. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**
(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

ग्रीष्मकालात् अनन्तरं वर्षाकालः आगच्छति। आकाशे मेघाः विहरन्ति। कृषकाः प्रसन्नाः भवन्ति। यदा वृष्टिः भवति तदा जलं भूमौ पतति। आकाशे मेघाः निरन्तरं गर्जन्ति। सर्वत्र भयंकरध्वनिः भवति। वनेषु मयूराः नृत्यन्ति। नद्यः तडागाः जलेन पूर्णाः भवन्ति। कृषकाः क्षेत्रेषु बीजानि वपन्ति। सर्वत्र हरितमयं वातावरणं भवति। किन्तु यदा अतिवृष्टिः भवति तदा तदा महती विपदा उत्पन्ना भवति। नदी तटेषु स्थितानि गृहाणि जले निमज्जितानि भवन्ति। पशु–पक्षिणः च म्रियन्ते। एतेन प्रकारेण यदा अनावृष्टिः भवति तदा अपि आपदः आगच्छति। तदा जलस्य अभावेन नदीतडागाः शुष्कानि भवन्ति। वृक्षाः नश्यन्ति। कृषिकार्यं असाध्यं भवति। कृषिं विना धन्योत्पादनं न भवति। बुभुक्षया जनाः मरणं प्राप्नुवन्ति। अतिवृष्टिः अनावृष्टेः मूलं मानवः भवति। पर्यावरणप्रदूषणेन ऋतूनां गतिः प्रभाविता भवति। अतः पर्यावरणस्य रक्षणं करणीयम्।

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकाः)**
(एक पद में उत्तर दीजिए।) (केवल दो प्रश्न)

**(1)** आकाशे काः विहरन्ति ?
**(2)** कुत्र भयंकरध्वनिः भवति ?
**(3)** कस्य अभावेन नदीतडागाः शुष्कानि भवन्ति ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(2×2=4 अंकाः)**
(पूर्ण वाक्य में उत्तर दीजिए।) (केवल दो प्रश्न)

**(1)** केन ऋतूनां गतिः प्रभाविता भवति ?
**(2)** कदा जलं भूमौ पतति ?
**(3)** कस्य मूलं मानवः भवति ?

**(स) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृते लिखत।** **(1×1=1 अंकः)**
(इस अनुच्छेद के लिए उचित शीर्षक लिखिए।)

**(द) यथानिर्देशं उत्तरत –**(केवलं प्रश्नत्रयम्) **(1×3=3 अंका:)**

(निर्देश के अनुसार उत्तर लिखिए।) (केवल तीन प्रश्न)

**(1)** कृषका: प्रसन्ना: भवन्ति। अत्र किं क्रियापदम् ?

**(क)** कृषका: **(ख)** प्रसन्ना: **(ग)** भवन्ति **(घ)** नास्ति

**(1)** नद्यः तडागाः' शब्दयो: किं वचनम् अस्ति ?

**(क)** एकवचनम् **(ख)** द्विवचनम् **(ग)** त्रिवचनम् **(घ)** बहुवचनम्

**(1)** जलम् शब्दस्य पर्यायवाची शब्द: क: ?

**(क)** सलिलम् **(ख)** पय: **(ग)** कमलम् **(घ)** क्षीरम्

**(1)** अत: पर्यावरणस्य रक्षणं करणीयम्। अत्र षष्ठिविभक्ति: कुत्र अस्ति ?

**(क)** अत: **(ख)** पर्यावरणस्य **(ग)** रक्षणं **(घ)** करणीयम्

## (खण्ड –ख) व्याकरण

**प्रश्न 02** व्याकरणाधारितानां प्रश्नानाम् उत्तराणि लिखत –**(पंचप्रश्ना:)** **(1×5=5 अंका:)**

**(1)** हृस्वस्वरा: के ? लिखत।

**(2)** क वर्गस्य उच्चारणस्थानं किम् ?

**(3)** क्ष वर्ण: कै: वर्णै: निर्मित: भवति ?

**(4)** च वर्गस्य लेखनं कुरू।

**(5)** संस्कृत वर्णमालायां कति वर्णा: सन्ति ?

**(6)** अन्तस्थ व्यंजनानि कानि ?

**प्रश्न 03 निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (प्रश्नत्रयम्)** **(1×3=3 अंका:)**

निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (कोई चार)

**(1) बालक** शब्दस्य तृतीया विभक्ति: एकवचनम् किम् ?

**(क)** बालक: **(ख)** बालकस्य **(ग)** बालकेन **(घ)** बालके

**(2) नदी** शब्दस्य सप्तमी विभक्ति: द्विवचनम् किम् ?

**(क)** नदीम् **(ख)** नद्याम् **(ग)** नद्यो: **(घ)** नदीनाम्

**(3) लता** शब्दस्य चतुर्थी विभक्ति: बहुवचनम् किम् ?

**(क)** लतायै **(ख)** लताभ्याम् **(ग)** लताभ्य: **(घ)** लताया:

**(4) राम** शब्दस्य द्वितीया विभक्ति: बहुवचनम् किम् ?

**(क)** रामम् **(ख)** रामौ **(ग)** रामयो: **(घ)** रामान्

**प्रश्न 04 निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (प्रश्नद्वयम्)** **(1×2=2 अंका:)**

निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (कोई चार)

**(1) गम्** धातो: लट्लकारस्य वर्तमानकालस्य उत्तमपुरुषस्य एकवचनम् किम् ?

**(क)** गच्छन्ति **(ख)** गच्छसि **(ग)** गच्छामि **(घ)** गच्छति

**(2) पठ्** धातो: लङ्लकारस्य भूतकालस्य अन्यपुरुषस्य बहुवचनम् किम् ?

**(क)** अपठत् **(ख)** अपठताम् **(ग)** अपठ: **(घ)** अपठन्

**(3) कृ** धातो: लृट्लकारस्य भविष्यकालस्य मध्यमपुरुषस्य द्विवचनम् किम् ?

**(क)** करिष्यसि **(ख)** करिष्यथ: **(ग)** करिष्यन्ति **(घ)** करिष्यथ

## (खण्ड –ग) पाठ्यपुस्तक

**प्रश्न 05 अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**

(नीचे लिखे नाट्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

ध्रुव: – अस्माकं राष्ट्रप्रतीकानि कानि सन्ति।

शिक्षक:– राष्ट्रध्वज: त्रिरंग:, राष्ट्रियचिह्नं अशोकस्तम्भ:, राष्ट्रगानं च जन–गण–मन अस्ति।

कमलपुष्पं, वटवृक्षः, व्याघ्रः, मयूरः, डॉल्फिनमत्स्यः, गंगानदी, आम्रफलं चापि राष्ट्रप्रतीकानि सन्ति।

निलयः – अस्माकं संस्कृतिः कीदृशी अस्ति ?

शिक्षकः – विश्वबन्धुत्वभावनया युक्ता संसारस्य समस्त संस्कृतिषु भारतीया संस्कृतिः मूर्धन्यास्ति। शिक्षायां ज्ञानेविज्ञाने च भारतं सर्वदा अग्रसरं विद्यते। प्राचीनकाले नालन्दा, तक्षशिला इत्यादयः विश्वविद्यालयाः सम्पूर्णे देशे अतीव प्रसिद्धाः आसन्। आधुनिक वैज्ञानिक युगेऽपि चिकित्साशास्त्रे संगणकविद्यायां अन्येषु च वैज्ञानिक क्षेत्रेषु भारतीयाः समग्रविश्वे प्रमुखाः सन्ति।

छात्राः – आचार्य भारतस्य कः कः सहायकः ?

शिक्षकः– साधुं पृष्टम्, वयं सर्वे सहायकाः स्मः।

छात्राः – वयम् अपि ?

शिक्षकः – आम। सर्वे जनाः स्वहितं त्यक्त्वा देशस्य हिताय चिन्तयन्तु। स्वच्छतायाः ध्याने कुर्वन्तु। छात्राः अपि नियमान् पालयन्तु सम्यक् अध्ययनं च कुर्वन्तु। एवं भवन्तः भारतस्य प्रगत्यां सहायकाः भविष्यन्ति।

मूल्यम् – वयं जागरित्वा राष्टस्य प्रगत्यां सहायकाः स्याम।

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**

(1) जनाः किं त्यक्त्वा देशस्य हिताय चिन्तयन्तु ?

(2) भारतं कुत्र अग्रसरं विद्यते ?

(3) छात्राः अपि कान् पालयन्तु ?

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**

(1) अस्माकं संस्कृतिः कीदृशी अस्ति ?

(2) भारतस्य कः कः सहायकः ?

(3) प्राचीनेकाले के विश्वविद्यालयाः प्रसिद्धाः आसन् ?

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकाः)**

(1) भवन्तः भारतस्य प्रगत्यां सहायकाः भविष्यन्ति। रेखांकिते शब्दे किं वचनम् अस्ति ?

(क) एकवचनम् (ख) द्विवचनम् (ग) बहुवचनम् (घ) अन्यवचनम्

(2) देशस्य हिताय चिन्तयन्तु। रेखांकिते शब्दे का विभक्तिः अस्ति ?

(क) प्रथमा (ख) तृतीया (ग) चतुर्थी (घ) षष्ठी

——— *समाप्तम्* ———